पृथूदकं, क्ली, (पृथु पुण्यप्रदत्वात् महदुदकं यस्य ।) तीर्थभेदः । यथा,—

"ते श्रुत्वा ऋषयः सर्व्वे तीर्थमाहात्म्यमुत्तमम् ।
कपालमोचनमिति नाम चक्रुः समागताः ॥
तत्रापि सुमहत्तीर्थं विश्वामित्रस्य विश्रुतम् ।
ब्राह्मण्यं लब्धवान् यत्र विश्वामित्रो महामुनिः ॥
तस्मिंस्तीर्थवरे स्नात्वा ब्राह्मण्यं लभते ध्रुवम् ।
ब्राह्मणस्तु विशुद्धात्मा परं पदमवाप्नुयात् ॥
ततः पृथूदकं गच्छेन्नियतो नियताशनः ।
तत्र सिद्धस्तु ब्रह्मर्षी रुषङ्गुर्नाम नामतः ॥
जातिस्मरो रुषङ्गुस्तु गङ्गाद्वारे सदा स्थितः ।
अन्तकालं ततो दृष्ट्वा पुत्त्रान् वचनमब्रवीत् ॥
इह श्रेयो न पश्यामि नयध्वं मां पृथूदकम् ।
विज्ञाय तस्य तद्भावं रुषङ्गोस्ते तपोधनाः ॥
तं वै तीर्थमुपानिन्युः सरस्वत्यास्तपोधनम् ।
स तैः पुत्त्रैः समानीतः सरस्वत्यां समाप्लुतः ॥
स्मृत्वा तीर्थगुणान् सर्व्वान् प्राहेदमृषिसत्तमः ।
सरस्वत्यास्तु तीरे यः संत्यजेदात्मनस्तनुम् ॥
पृथूदके जप्यपरो नैनं श्वो मरणं लभेत् ।
तत्रैव ब्रह्मयोन्यस्ति ब्रह्मणा यत्र निर्म्मिता ॥
पृथूदकं समाश्रित्य सरस्वत्यास्तटे स्थितः ।
चतुर्व्वर्णस्य सृष्ट्यर्थमात्मज्ञानपरोऽभवत् ॥
तस्याभिध्यायतः सृष्टिं ब्रह्मणोऽव्यक्तजन्मनः ।
मुखतो ब्राह्मणा जाता बाहुभ्यां क्षत्त्रियास्तथा ॥
ऊरुभ्यां वैश्यजातीयाः पद्भ्यां शूद्रास्ततोऽभवन् ।
चातुर्व्वर्ण्यं ततो दृष्ट्वा आश्रमस्थान् सुतांस्ततः ॥
एवं प्रतिष्ठितं तीर्थं ब्रह्मयोनीतिसंज्ञितम् ।
तत्र स्नात्वा मुक्तिकामः पुनर्योनिं न पश्यति ॥"

इति वामनपुराणे ३८ अध्यायः ॥

(यथा च महाभारते । ३ । ८३ ।१३२—१३६ ।

"ततो गच्छेत राजेन्द्र ! तीर्थं त्रैलोक्यविश्रुतम् ।
पृथूदकमिति ख्यातं कार्त्तिकेयस्य वै नृप ! ॥
तत्राभिषेकं कुर्व्वीत पितृदेवार्च्चने रतः ।
अज्ञानात् ज्ञानतो वापि स्त्रिया वा पुरुषेण वा ॥
यत्किञ्चिदशुभं कर्म्म कृतं मानुषबुद्धिना ।
तत् सर्व्वं नश्यते तत्र स्नानमात्रस्य भारत ! ॥
अश्वमेधफलञ्चापि लभते स्वर्गमेव च ।
पुण्यमाहुः कुरुक्षेत्रं कुरुक्षेत्रात् सरस्वती ॥
सरस्वत्याश्च तीर्थानि तीर्थेभ्यश्च पृथूदकम् ।
उत्तमं सर्व्वतीर्थानां यस्त्यजेदात्मनस्तनुम् ॥
पृथूदके जप्यपरो न तस्य मरणं भवेत् ।
गीतं सनत्कुमारेण व्यासेन च महात्मना ॥
वेदे च नियतं राजन्नधिगच्छेत् पृथूदकम् ।
पृथूदकात् तीर्थतमं नान्यत्तीर्थं कुरूद्वह ! ॥
तन्मेध्यं तत् पवित्रञ्च पावनञ्च न संशयः ।
तत्र स्नात्वा दिवं यान्ति येऽपि पापकृता नराः ।
पृथूदके नरश्रेष्ठ ! एवमाहुर्मनीषिणः ॥" )

पृथूदरः, पुं, (पृथु महदुदरं यस्य ।) मेषः । इति हारावली । ८० ॥ बृहत्कुक्षौ, त्रि ॥

पृथ्वी, स्त्री, (पृथुः स्थूलत्वगुणयुक्ता ।"वोतो गुणवचनात् ।" ४।१।४४। इति ङीष् ।) पृथिवी । (यथा, देवीभागवते । ३ । १३ । ८ ।

"मधुकैटभयोर्म्मेदसंयोगात् मेदिनी स्मृता ।
धारणाच्च धरा प्रोक्ता पृथ्वी विस्तारयोगतः ॥")

पृथोर्दुहितृत्वस्वीकारादेतन्नाम । यथा, अग्निपुराणे ।

"दुहितृत्वमनुप्राप्ता देवी पृथ्वी तथोच्यते ॥"

हिङ्गुपत्त्री । कृष्णजीरकः । इत्यमरः । २ । ९ । ३७, २।९। ४० ॥ (एतस्याः पर्य्यायो यथा,—

"कृष्णजीरः सुगन्धश्च तथैवोद्गारशोधनः ।
कालाजाजी तु सुषवी कालिका चोपकालिका ॥
पृथ्वीका कारवी पृथ्वी पृथुः कृष्णोपकुञ्चिका ।
उपकुञ्ची च कुञ्ची च बृहज्जीरक इत्यपि ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

हस्तार्द्धमाता । इति हेमचन्द्रः ॥ पुनर्नवा । स्थूलैला । इति राजनिर्घण्टः ॥ (सप्तदशाक्षरपादकश्छन्दोभेदः । इति छन्दोमञ्जरी ॥ अस्य लक्षणादिकं छन्दःशब्दे द्रष्टव्यम् ॥)

पृथ्वीका, स्त्री, (पृथ्वी + स्वार्थे कन् ।) बृहदेला । इत्यमरः । २ । ४ । १२५ ॥ (अस्याः पर्य्यायो यथा,—

"एलास्थूला च बहुला पृथ्वीका त्रिपुटापि च ।
भद्रैला बृहदेला च चन्द्रबाला च निष्कुटिः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

सूक्ष्मैला । कृष्णजीरकः । इति रत्नमाला ॥ हिङ्गुपत्त्री । इति राजनिर्घण्टः ॥

पृथ्वीकुरवकः, पुं (पृथ्व्यां भूमौ कुरवक इव ।) श्वेतमन्दारकः । इति राजनिर्घण्टः ॥

पृथ्वीजं, क्ली, (पृथ्व्यां जायते इति । जन + डः ।) गड़लवणम् । इति राजनिर्घण्टः ॥

पृदाकुः, पुं, (पर्द्दते इति । पर्द्द अपानशब्दे + "पर्द्देर्नित् सम्प्रसारणमल्लोपश्च ।" उणा० ३ । ८० । इति काकुः रेफस्य सम्प्रसारणं अल्लोपश्च ।) सर्पः । इत्यमरः । १ । ८ । ६ ॥ (यथा, महाभारते । ६ । १७८ । २७ ।

"स भीमं सहसाभ्येत्य पृदाकुः कुपितो भृशम् ।
जग्राहाजगरो ग्राहो भुजयोरुभयोर्बलात् ॥")

वृश्चिकः । व्याघ्रः । चित्रकः । इति मेदिनी । के, १२५ ॥ कुञ्जरः । वृक्षः । इति संक्षिप्तसारोणादिवृत्तिः ॥

पृश्निः, त्रि, (स्पृश्यते इति । स्पृश संस्पर्शे + "घृणिपृश्नीति ।" उणा० ४।५२। इति नि निपातनात् साधुः ।) अल्पतनुः । इत्यमरः । २। ६ । ४८ ॥ (यथा, महाभारते । १३ । २६ । ८६ ।

"दृष्ट्वा पृश्निं बृहतीं विप्रकृष्टां
शिवाम्भसां भगिनीं सुप्रसन्नाम् ।
विभावरीं सर्व्वभूतप्रतिष्ठां
गङ्गां गता ये त्रिदिवं गतास्ते ॥" )

खर्व्वदुर्ब्बलाल्पाङ्गः । इति भरतः ॥ (शुक्लवर्णः । यथा, ऋग्वेदे । १ । १६० । ३ ।

"धेनुञ्च पृश्निं वृषभं सुरेतसम् ॥"

"पृश्निं शुक्लवर्णां धेनुम् ।" इति तद्भाष्ये सायनः ॥ प्राप्ततेजाः । यथा, ऋग्वेदे । १० । १८९ । १ ।

"आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः ॥" )

पृश्निः, स्त्री, (स्पृशति द्रव्यजातं स्पृश्यते इति वा । स्पृश + "घृणिपृश्नीति ।"उणा०४।५२। इति नि निपातनात् साधुः ।) रश्मिः । इति शब्दरत्नावली ॥ (अन्नम् । वेदाः । जलम् । अमृतम् । इति महाभारतम् । १२ । ३४१ । ४४ ॥) सुतपोराजपत्नी । सैव जन्मान्तरे देवकी भूता । इति श्रीभागवते १० स्कन्धः ॥

पृश्निका, स्त्री, (पृश्नौ जले कायति शोभते इति । कै + कः । यद्वा, पृश्नि स्वल्पं कं जलं यत्र ।) कुम्भिका । इति शब्दमाला ॥

पृश्निगर्भः, पुं, (पृश्निर्वेदादयो गर्भे यस्य । यद्वा, पृश्निः जन्मान्तरजातदेवकी तस्याः गर्भ उत्पत्तिस्थानत्वेनास्त्यस्येति । अच् ।) श्रीकृष्णः । इति हारावली । ९ ॥ (अस्य निरुक्तिर्यथा महाभारते । १२ । ३४१ । ४३ ।

"पृश्निरित्युच्यते चान्नं वेदा आपोऽमृतं तथा ।
ममैतानि सदा गर्भः पृश्निगर्भस्ततोऽस्म्यहम् ॥")

पृश्निपर्णी, स्त्री, (पृश्नि स्वल्पं पर्णमस्याः । ङीष् ।) लताविशेषः । चाकुलिया इति भाषा । चकरौत् इति हिन्दी भाषा । तत्पर्य्यायः । पृथक्पर्णी २ चित्रपर्णी ३ अङ्घ्रिवल्लिका ४ क्रोष्टुविन्ना ५ सिंहपुच्छी ६ कलशिः ७ धावनिः ८ गुहा ९ । इत्यमरः । २ । ४ । ९२ ॥ केचित्तु पृश्निपर्ण्यादिचतुष्कं चाकुलिया इति ख्यातायाम् । क्रोष्टुविन्नादिपञ्चकं विरालकाँद इति ख्यातायामित्याहुः । एतत्तु वैद्या न श्रद्दधते । ते हि कलश्यादिशब्देन पृश्निपर्णीमेव गृह्णन्ति । पृश्निपर्णी सिंहपुच्छी चित्रपर्णी कटुसिंहपुच्छी अनयोरल्पभेदान्नवैवेकार्थ्या इति केचित् । इति भरतः ॥ अपि च ।

पिष्टपर्णी १० लाङ्गली ११ क्रोष्टुपुच्छिका १२ पूर्णपर्णी १३ कलशी १४ क्रोष्टुकमेखला १५ दीर्घा १६ शृगालवृन्ता १७ त्रिपर्णी १८ सिंहपुच्छिका १९ दीर्घपत्रा २० अतिगुहा २१ घृष्ठिला २२ चित्रपर्णिका २३ । इति साङ्गे रत्नमाला ॥ महागुहा २४ शृगालविन्ना २५ धमनी २६ मेखला २७ लाङ्गूलिका २८ पृष्टिपर्णी २९ दीर्घपर्णी ३० । इति राजनिर्घण्टः ॥ अङ्घ्रिपर्णी ३१ धावनी ३२ । इति भावप्रकाशः ॥ अस्या गुणाः । कटुत्वम् । अतीसारकासवातरोगज्वरोन्मादव्रणदाहनाशित्वञ्च । इति राजनिर्घण्टः ॥ त्रिदोषघ्नत्वम् । वृष्यत्वम् । मधुरत्वम् । सरत्वम् । श्वासरक्तातीसारतृड्वमिनाशित्वञ्च । इति भावप्रकाशः ॥ ग्राहित्वम् । इति राजवल्लभः ॥

पृश्निभद्रः, पुं, (पृश्नौ भद्रं यस्य ।) श्रीकृष्णः । इति शब्दमाला ॥

पृश्निशृङ्गः, पुं, (पृश्निर्वेदादयः शृङ्गमिवास्य ।) विष्णुः । इति शब्दमाला ॥ (पृश्नि स्वल्पं शृङ्गमिव मुण्डाग्रं यस्य ।) गणेशः । इति त्रिकाण्डशेषः ॥